# Hanumat Panjara Stotram

# હનુમત્પઞ્જરસ્તોત્રમ્

## Document Information

Text title : Hanumat Panjara Stotram

File name : hanumatpanjarastotram.itx

Category : hanumaana, stotra, panjara

Location : doc_hanumaana

Transliterated by : NA

Proofread by : NA

Latest update : July 5, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskcript**.

July 5, 2024

*sanskritdocuments.org*

# હનુમત્પઞ્જરસ્તોત્રમ્

શ્રીપરાશરસંહિતાન્તર્ગતે ચતુસ્સમતિતમઃ પટલઃ
હનુમત્પઞ્જરકથનં -
પરાશરઃ -
પઞ્જરન્તુ પ્રવક્ષ્યામિ શ‍ૃણુ મૈત્રેય ! આદરાત્ ॥ ૧॥

અસ્ય પઞ્જરસ્ય ઋષિઃ શ્રીરામચન્દ્ર ભગવાનિતિ ચ
છન્દોઽનુષ્ટુપ્ । શ્રીપઞ્ચવક્ત્રહનુમાન દેવતેતિ ચ । હ્રાં બીજમ્ ।
સ્વાહા શક્તિઃ । પ્રણવો કીલકં સ્મૃતઃ । મન્ત્રોક્ત
દેવતાપ્રસાદસિધ્યર્થે વિનિયોગઃ ।
દીર્ઘયામાયયાયુક્તૈઃ ષડઙ્ગૈઃ પરિકીર્તિતઃ ।
રામદૂત, વાનરમુખ, વાયુનન્દન તથા નૃસિંહમુખપૂર્વકં
અઞ્જનાસૂનુઃ પરઞ્ચ । ગરુડમુખ ચ તથા હરિમર્કટ પદં પરમ્ ।
ક્રોડમુખં પદઞ્ચાન્તં રામકાર્યધુરન્ધરઃ ।
તતો અશ્વમુખઞ્ચાન્તમ્ । સર્વરાક્ષસનાશનઃ ।
સર્વમુખશબ્દાન્તાઃ સર્વં ચતુર્થ્યં તં ગતાઃ ।
ષડઙ્ગે કરાઙ્ગાદયો હ્રાં ષટ્કાદિભિસ્સંયુતમ્ । ન્યસેત્સર્વ મનન્યધીઃ ।
તતો ધ્યાનં પઠિત્વાતુ પૂર્વોક્તમાર્ગતો વાપિ પઞ્જરમારભેત્તતઃ ॥ ૨॥

આદૌ પ્રણવમુચ્ચાર્યં વન્દે હરિપદં તતઃ ।
ઉચ્ચાર્ય મર્કટપદં મર્કટાયેતિ ચોચ્ચરેત્ ॥ ૩॥

અગ્નિજાયાં સમુચ્ચાર્ય દ્વાદશાર્ણો મહામનુઃ ॥ ૪॥

શિરઃ પાતુ મમ સદા સર્વસૌખ્યપ્રદાયકઃ ॥ ૫॥

આદૌ પ્રણવમુચ્ચાર્ય કપિબીજં તતોચ્ચરેત્ ।
નૃસિંહબીજમુચ્ચાર્ય ગારુડઞ્ચ સમુચ્ચરેત્ ॥ ૬॥

વરાહબીજમુચ્ચાર્ય હયગ્રીવં તતોચ્ચરેન્ ।

નમઃ પદં તતોચ્ચાર્ય સ પઞ્ચાસ્ય મહાકપેઃ ।
ચતુર્દશાર્ણમન્ત્રોઽયં મુખં પાયાત્સદા મમ ॥ ૭॥

આદૌ પ્રણવમુચ્ચાર્ય નમો ભગવતે પદં ।
પઞ્ચવદનાય ચોચ્ચાર્ય પૂર્વમુખેતિ ચોચ્ચરેત્ ॥ ૮॥

વાનરં બીજમુચ્ચાર્ય કપિમુખાય ચોચ્ચરેત્ ।
સર્વશત્રુહરાયેતિ મહાબલાય ચોચ્ચરેત્ ॥ ૯॥

અગ્નિજાયાં તતોચ્ચાર્ય સપ્તત્રિંશાક્ષરાભિધઃ ।
કણ્ઠં મમ સદા પાતુ સર્વશત્રુવિનાશકઃ ॥ ૧૦॥

ઉચ્ચાર્યં પ્રણવં ચાદૌ નમો ભગવતેતિચ ।
નારસિંહ મહાબીજ કરાલપદમુચ્ચરેત્ ॥ ૧૧॥

નૃસિંહાય પદં ચોક્ત્વા સકલભૂતપ્રેતચ ।
પિશાચ્ચબ્રહ્મરાક્ષસ પ્રમથનાય પદં વદેત્ ॥ ૧૨॥

અગ્નિજાયાં તતોચ્ચાર્ય વસુ વેદાર્ણકો મનુઃ ।
હૃદયં મે સદા પાતુ સર્વશત્રુવિનાશકઃ ॥ ૧૩॥

ૐ નમો ભગવતેતિ પઞ્ચવદનાય તતઃ ।
પશ્ચિમમુખેતિ ચોચ્ચાર્ય ગારુડં બીજમુચ્ચરેત્ ॥ ૧૪॥

વીરગરુડાય મહાબલાયેતિ પદં તતઃ ।
સર્વનાગ પ્રમથના યાન્તે સકલવિષેતિ ॥ ૧૫॥

હરાય સ્વાહા ત્વં તતઃ વેદાભ્યક્ષરસંયુતઃ ।
હનુમન્મમોદરં પાતુ સર્વરોગનિબર્હણઃ ॥ ૧૬॥

ૐ નમો ભગવતેતિ પઞ્ચવદનાય તતઃ ।
ઉત્તરમુખે ચોજ્ચાર્યં ક્રોડવાગ્બીજમુચ્ચરેત્ ॥ ૧૭॥

આદિવારાહ સર્વસમ્પત્પ્રદાય નિધિ ભૂમિચ ।
પ્રદાય પશ્ચાજ્જ્વરેતિ રોગ નિકૃન્તન સ્વાહા ॥ ૧૮॥

નાભિં પાતુ મમ સદા સુખસૌભાગ્ય હેતુકઃ ।
નેત્ર બાણાર્ણકો મનોઃ પશ્ચાત્પ્રણવમુચ્ચરેત્ ॥ ૧૯॥

ૐ નમો ભગવતે પઞ્ચવદનાય પદં તતઃ ।
ઊર્ધ્વમુખેત્યન્તે હયબીજં તતઃ પરમ્ ॥ ૨૦॥

હયગ્રીવાય સકલપ્રદાય સકલેતિચ ।
જનવશીકરણાય સકલ દાનવાન્તકાય ॥ ૨૧॥

પશ્ચાત્પ્રાજ્ઞાય સ્વાહેતિ ષટ્પઞ્ચાશદ્વર્ણકો મનુઃ ।
મમ જાનુદ્વયં પાતુ સર્વ રાક્ષસનાશકઃ ॥ ૨૨॥

ૐ ચ હ્રીમિત્યયં ચોક્ત્વા નમો ભગવતે તતઃ ।
બ્રહ્માસ્ત્રસંહારકાય રાક્ષસકુલનાશયેતિ ॥ ૨૩॥

પતાક હનુમતેતિ માયાબીજત્રયં તતઃ ।
ક્રોડાસ્ત્ર વહ્નિજાયાં તં મનુઃ પાદદ્વયં મમ ॥ ૨૪॥

હ્રાં નમઃ પઞ્ચવક્ત્રાય નાભિદેશં સદા મમ ।
હ્રીં નમઃ પઞ્ચવક્ત્રાય પાતુ જઙ્ઘદ્વયં મમ ।
હ્રૂં નમઃ પઞ્ચવક્ત્રાય પાતુ જાનુદ્વયં મમ ।
હ્રૈં નમઃ પઞ્ચવક્ત્રાય પાદદ્વન્દ્વં સદાવતુ ।
હ્રૌં નમઃ પઞ્ચવક્ત્રાય કટિદેશં સદાવતુ ।
હ્રઃ નમઃ પઞ્ચવક્ત્રાય ચોદરં પાતુ સર્વદા ।
ઐ નમઃ પઞ્ચવક્ત્રાય હૃદયં પાતુ સર્વદા ।
ક્લાં નમઃ પઞ્ચવક્ત્રાય બાહુયુગ્મં સદાવતુ ।
ક્લીં નમઃ પઞ્ચવક્ત્રાય કરયુગ્મં સદા મમ ।
ક્લૂં નમઃ પઞ્ચવક્ત્રાય કણ્ઠદેશં સદાવતુ ।
ક્લૈં નમઃ પઞ્ચવક્ત્રાય ચુબુકં મે સદાવતુ ।
ક્લૌં નમઃ પઞ્ચવક્ત્રાય પાતુ ચોષ્ઠદ્વયં મમ ।
ક્લઃ નમઃ પઞ્ચવક્ત્રાય નેત્રયુગ્મં સદાવતુ ।
રાં નમઃ પઞ્ચવક્ત્રાય શોત્રયુગ્મં સદાવતુ ।
રીં નમઃ પઞ્ચવક્ત્રાય ફાલં પાતુ મહાબલઃ ।
રૂં નમઃ પઞ્ચવક્ત્રાય શિરઃ પાયાત્સદા મમ ।
રૈં નમઃ પઞ્ચવક્ત્રાય શિખાં મમ સદાવતુ ।
રૌં નમઃ પઞ્ચવક્ત્રાય મૂર્ધાનં પાતુ સર્વદા ।
રઃ નમઃ પઞ્ચવક્ત્રાય મુખં પાતુ સદા મમ ।
ક્ષ્રાં નમઃ પઞ્ચવક્ત્રાય શ્રોત્રયુગ્મં સદાવતુ ।
ક્ષ્રીં નમઃ પઞ્ચવક્ત્રાય નેત્રયુગ્મં સદા મમ ।

ક્ષૂં નમઃ પઞ્ચવક્ત્રાય પાતુ ચોષ્ઠદ્વયં મમ ।
ક્ષૈં નમઃ પઞ્ચવક્ત્રાય ભૃયુગ્મં પાતુ સર્વદા ।
ક્ષૌં નમઃ પઞ્ચવક્ત્રાય નાસિકાં પાતુ સર્વદા ।
ક્ષઃ નમઃ પઞ્ચવક્ત્રાય કણ્ઠં પાતુ કપીશ્વરઃ ।
ગ્લાં નમઃ પઞ્ચવક્ત્રાય પાતુ વક્ષસ્થલં મમ ।
ગ્લીં નમઃ પઞ્ચવક્ત્રાય બાહુયુગ્મં સદા મમ ।
ગ્લૂં નમઃ પઞ્ચવક્ત્રાય કરયુગ્મં સદાવતુ ।
ગ્લૈં નમઃ પઞ્ચવક્ત્રાય મમ પાતુ વલિત્રય ।
ગ્લૌં નમઃ પઞ્ચવક્ત્રાય ચોરદં પાતુ સર્વદા ।
ગ્લઃ નમઃ પઞ્ચવક્ત્રાય નાભિં પાતુ સદા મમ ।
આં નમઃ પઞ્ચવક્ત્રાય વાનરાય કટિં મમ ।
ઈં નમઃ પઞ્ચવક્ત્રાય ઊરુયુગ્મં સદાવતુ ।
ઊં નમઃ પઞ્ચવક્ત્રાય જાનુદ્વન્દ્વં સદા મમ ।
ઐં નમઃ પઞ્ચવક્ત્રાય ગુલ્ફદ્વન્દ્વં સદાવતુ ।
ઔં નમઃ પઞ્ચવક્ત્રાય પાદદ્વન્દ્વં સદાવતુ ।
અઃ નમઃ પઞ્ચવક્ત્રાય સર્વાઙ્ગાનિ સદાવતુ ॥ ૨૫॥

વાનરઃ પૂર્વતઃ પાતુ દક્ષિણે નરકેસરિઃ ।
પ્રતીચ્યાં પાતુ ગરુડ ઉત્તરે પાતુ સૂકરઃ ।
ઊર્ધ્વં હયાનનઃ પાતુ સર્વતઃ પાતુ મૃત્યુહા ॥ ૨૬॥

વાનરઃ પૂર્વતઃ પાતુ આગ્નેય્યાં વાયુનન્દનઃ ।
દક્ષિણે પાતુ હનુમાન્ નિરૃતે કેસરીપ્રિયઃ ॥ ૨૭॥

પ્રતીચ્યાં પાતુ દૈત્યારિઃ વાયવ્યાં પાતુ મઙ્ગલઃ ।
ઉત્તરે રામદાસસ્તુ નિમ્નં યુદ્ધવિશારદઃ ॥ ૨૮॥

ઊર્ધ્વે રામસખઃ પાતુ પાતાલે ચ કપીશ્વરઃ ।
સર્વતઃ પાતુ પઞ્ચાસ્યઃ સર્વરોગવિકૃન્તનઃ ॥ ૨૯॥

હનુમાન પૂર્વતઃ પાતુ દક્ષિણે પવનાત્મજઃ ।
પાતુ પ્રતીચિ મક્ષઘ્નો ઉદીચ્યાં સાગરતારકઃ ॥ ૩૦॥

ઊર્ધ્વં કેસરીનન્દનઃ પાત્વધસ્તાદ્વિષ્ણુભક્તઃ ।
પાતુ મધ્યપ્રદેશેતુ સર્વલઙ્કા વિદાહકઃ ॥ ૩૧॥

એવં સર્વતો માં પાતુ પઞ્ચવક્ત્રઃ સદા કપિઃ ॥ ૩૨॥

સુગ્રીવસચિવઃ પાતુ મસ્તકં મમ સર્વદા ।
વાયુનન્દનઃ ફાલં મે મહાવીરઃ ભ્રૂમધ્યમમ્ ॥ ૩૩ ॥

નેત્રે છાયાપહારીચ પાતુ શ્રોત્રે પ્લવઙ્ગમઃ ।
કપોલૌ કર્ણમૂલેચ પાતુ શ્રીરામકિઙ્કરઃ ॥ ૩૪ ॥

નાસાગ્રમઞ્જનાસૂનુઃ પાતુ વક્ત્રઃ હરીશ્વરઃ ।
પાતુ કણ્ઠચ દૈત્યારિઃ સ્કન્ધૌ પાતુસુરાર્ચિતઃ ॥ ૩૫ ॥

જાનૌ પાતુ મહાતેજઃ કૂર્પરૌ ચરણાયુધઃ ।
નખાન્ નખાયુધઃ પાતુ કક્ષં પાતુ કપીશ્વરઃ ॥ ૩૬ ॥

સીતાશોકાપહારીતુ સ્તનૌ પાતુ નિરન્તરમ્ ।
લક્ષ્મણપ્રાણદાતાઽસૌ કુક્ષિ પાત્વનિશં મમ ॥ ૩૭ ॥

વક્ષૌ મુદ્રાપહારીચ પાતુ ભુજાયુધઃ ।
લખિણીભઞ્જનઃ પાતુ પૃષ્ઠદેશે નિરન્તરમ્ ॥ ૩૮ ॥

નાભિઞ્ચ રામદાસસ્તુ કટિં પાત્વનિલાત્મજઃ ।
ગુહ્યં પાતુ મહાપ્રાજ્ઞઃ સન્ધૌ પાતુ શિવપ્રિયઃ ॥ ૩૯ ॥

ઊરૂચ જાનુની પાતુ લઙ્કાપ્રાસાદભઞ્જનઃ ।
જઙ્ઘૌ પાતુ કપિશ્રેષ્ઠઃ ગુલ્કો પાતુ મહાબલઃ ॥ ૪૦ ॥

અચલોદ્ધારકઃ પાતુ પાદૌ ભાસ્કરસન્નિભઃ ।
અઙ્ગાન્યમિતસત્વાઢ્યઃ પાતુ પાદાઙ્ગુલિસ્સદા ॥ ૪૧ ॥

સર્વાઙ્ગાનિ મહાશૂરઃ પાતુ માં રોમવાન્ સદા ।
ભાર્યાં પાતુ મહાતેજઃ પુત્રાન્ પાતુ નખાયુધઃ ॥ ૪૨ ॥

પશૂન્ પઞ્ચાનનઃ પાતુ ક્ષેત્રં પાતુ કપીશ્વરઃ ।
બન્ધૂન્ પાતુ રઘુશ્રેષ્ઠઃ દાસઃ પવનસમ્ભવઃ ॥ ૪૩ ॥

સીતા શોકાપહારી સઃ ગૃહાન્ મમ સદાવતુ ॥ ૪૪ ॥

હનૂમત્પઞ્જરં યસ્તુ પઠેદ્વિદ્વાન્ વિચક્ષણઃ ।
સ એષ પુરુષશ્રેષ્ઠો ભક્તિ મુક્તિઞ્ચ વિન્દતિ ॥ ૪૫ ॥

કાલત્રયેઽપ્યેકકાલે પઠેન્માસત્રયં નરઃ ।
સર્વશત્રૂન્ ક્ષણે જિત્વા સ્વયઞ્ચ વિજયી ભવેત્ ॥ ૪૬ ॥

અર્ધરાત્રૌ જલે સ્થિત્વા સપ્તવારં પઠેદ્યદિ ।
ક્ષયાપસ્મારકુષ્ઠાદિ તાપજ્વરનિવારણમ્ ॥ ૪૭॥

અર્કવારેઽશ્વત્થમૂલે સ્થિત્વા પઠતિ યઃ પુમાન્ ।
સ પુમાન્ શ્રિયમાપ્નોતિ સઙ્ગ્રામે વિજયી ભવેત્ ॥ ૪૮॥

અનેન મન્ત્રિતં ચાપિ યઃ પિબેત્ રોગપીડિતઃ ।
સ નરો રોગનિર્મુક્તઃ સુખી ભવતિ નિશ્ચયઃ ॥ ૪૯॥

યો નિત્યં ધ્યાયેદ્યસ્તુ સર્વમન્ત્રવિનિર્મિતમ્ ।
તં દૃષ્ટ્વા દેવતાસ્સર્વે નમસ્યન્તિ કપીશ્વરમ્ ॥ ૫૦॥

રાક્ષસાસ્તુ પલાયન્તે ભૂતા ધાવન્તિ સર્વતઃ ॥ ૫૧॥

ઇદં પઞ્જરમજ્ઞાત્વા યો જપન્મન્ત્રનાયકમ્ ।
ન શીઘ્રં ફલમાપ્નોતિ સત્યં સત્યં મયોદિતમ્ ॥ ૫૨॥

ત્રિકાલમેકકાલં વા પઞ્જરં ધારયેચ્છુભમ્ ।
પઞ્જરં વિધિવજ્જપ્ત્વા સ્તોત્રૈઃ વેદાન્તસમ્મિતૈઃ ।
તોષયેદઞ્જનાસૂનું સર્વરાક્ષસમર્દનમ્ ॥ ૫૩॥

ઇતીદં પઞ્જરં યસ્તુ પઞ્ચવક્ત્રહનૂમતઃ ।
ધારયેત્ શ્રાવયેદ્વાપિ કૃતકૃત્યો ભવેન્નરઃ ॥ ૫૪॥

ઇતિ શ્રીપરાશરસંહિતાયાં શ્રીપરાશરમૈત્રેયસંવાદે
શ્રીપઞ્ચમુખહનુમત્પઞ્જરં નામ ચતુસ્સપ્તતિતમઃ પટલઃ ।

*Hanumat Panjara Stotram*
pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*